𑆩𑆁𑆠𑇀𑆫𑆫𑆠𑇀𑆤𑆩𑆁𑆘𑆷𑆰𑆳

𑇔𑇕𑇐𑇔

4504

F. = 11

सं० ४५०४

मंत्रसंग्रहः प० ११

मंत्र ७६५

पत्र २१

मं
॥१॥

श्रीगणेशायनमः॥श्रीढुंढिराजायनमः॥प्रणम्यपार्वतीनाथंपुराणपुरुषो
त्तमं॥क्रियतेमंत्ररत्नानांमंजूषाविशदात्मना॥१॥पटलैरष्टभिःपूर्णासप्र
योगैःसमंत्रकैः॥तत्रादौगुरुशिष्याणांलक्षणंवच्मितान्यहं॥२॥शान्तोदां
तःकुलीनश्चविनीतःशुद्धवेषवान्॥शुद्धाचारःसुप्रसिद्धःशुचिर्दक्षःसुबुद्धि
मान्॥आश्रमीध्याननिष्ठश्चमंत्रतंत्रविचक्षणः॥निग्रहानुग्रहेशक्तोगु
रुरित्यभिधीयते॥अथशिष्यलक्षणं॥शांतोविनीतःशुद्धात्माश्रद्धावान्
धारणाक्षमः॥समर्थश्चकुलीनश्चप्राज्ञःसच्चरितोधनी॥एवमादिगुणो
पेतःशिष्योभवतिनान्यथा॥गुरुतोशिष्यतावापितयोर्वत्सरवासतः॥ रा.म.० ॥१॥

तत्र दीक्षां विना मंत्रग्रहणमेव न संभवति ॥ अदीक्षितस्य प्रदुष्टत्वात्पापक्षयाभावा
त् ॥ प्रक्षीणपापस्यैव मंत्रेऽधिकारात् ॥ दिव्यभावं ददाति पापक्षिणोति चेति दी
क्षारूपत्वाच्च ॥ सम्यग्गुरोर्दीक्षां प्राप्य मंत्रग्रहणं कर्त्तव्यं ॥ तत्रापि सिद्धसाध्यादि
भेदैश्च स्वकुलान्यकुलादिभिश्च तत्साधनादिभिश्च संशोध्यैव तद्गुरुणा दीक्षा
दातव्या ॥ शोधनप्रकारं संक्षेपतो व्याहरिष्यामः ॥ सिद्धसाध्यादिभेदेन स्वकु
लान्यकुलेन च ॥ बालप्रौढजराभेदैस्तथा स्त्रीपुंनपुंसकैः ॥ राशिनक्षत्रभेदेन
सुप्तबुद्धादिभिस्तथा ॥ ऋणेन च धनेनापि भागशास्त्रोपलक्षिते ॥ तथा
हि प्राक्पश्चिमाग्रे रेखापंचकं तथैव दक्षिणोत्तररेखापंचकं कार्यं ॥ तत्र प्रथ

मत्तृतीयएकादशनवकोष्ठेषुयथाक्रमंअकारादिस्वरचतुष्टयंविलिख्यद्विती
यचतुर्थद्वादशदशकोष्ठेषूत्तरस्वरचतुष्टयंविलिख्य।।तथैवषष्ठाष्टमयोःषोड
शचतुर्दशकोष्ठेषूत्तरस्वरचतुष्टयंविलिख्य।पंचमसप्तमपंचदशत्रयोदशको
ष्ठकेषुअवशिष्टान्स्वरान्विलिख्य।कादीन्वर्णान्सोनैवक्रमेणविलिखेत्।
कोष्ठेषुआद्यस्वरेषुयोवर्णस्तत्पंचममालिखेत्।।तत्रद्वित्रिचतुष्ककेषुत
त्तत्पंचममालिखेत्।यस्मिन्कोष्ठेसाधकस्यनिजनामाद्यक्षरंभवेत्तत्देव
सिद्धंजानीयात्।ऋक्तात्तुगणानाक्रमात्।मंत्राद्यक्षरपर्यंतंकृत्वागणानीयं
सर्वकोष्ठेषुप्रागदक्षिणेन।।तत्रसिद्धःसुसिद्धःस्वीकार्यः।।साध्यस्तुमध्य

2

मः ॥ अरिस्त्याज्यः ॥ तत्र सिद्धार्णौ बांधवा प्रोक्ता साध्यस्तो सेवका मताः । सुसिद्धः पोष
का ज्ञेयाः । शत्रु घातकाः प्रोक्तास्त्याज्या सर्वं हि सर्वदा ॥ सिद्धः सिध्यति कालेन सा
ध्यस्तु जपहोमतः । सुसिद्धो ग्रहणादेव रिपुर्मूलनिकृंतनः ॥ सिद्धः सिद्धोपयो
क्तेन द्विगुणात्सिद्धसाधकः । सिद्धः सुसिद्धोर्द्धजपात्सिद्धारिर्हंति बांधवान् ॥
साध्यसिद्धो द्विगुणितः साध्यसाध्यो निरर्थकः । साध्यसुसिद्धस्त्रिगुणात्
साध्यारिर्हंति गोत्रजान् ॥ सुसिद्धसिद्धोर्द्धजपात्तत्साध्यो द्विगुणाधिकात् ॥ त
त्सुसिद्धो ग्रहणात्तत्सदरिर्ज्ञातिजातिहा ॥ अरिसिद्धः सुतं हन्यादरिसाध्यस्तु
कन्यकां । तत्सुसिद्धस्तु पत्नीघ्नस्तदरिर्हंति साधकं ॥ आद्यश्चैकादशांके द्विच

मं०
॥३॥

3

तुर्दशपक्षिकेषु। षष्ठाष्टा शिमनौ पंचे सप्तपंचदशा मन्मथे। न्दीसिंहार्कवराहाणां प्रा
साद्यप्रासावम्यच।। सपिंडाक्षरमंत्राणां सिद्धारिर्न्नैव शोधयेत्। स्वप्नलब्धे स्त्रिया
दत्ते मालामंत्रे च त्र्यक्षरे।। वैदिकेषु च सर्वेषु सिद्धारिर्न्नैव शोधयेत्।। सिद्धसिद्धो
ग्राह्यो साध्यं शत्रुं च वर्जयेन्मतिमान्। आदावतौ रिपुर्यस्य भवेत्याज्यः स मंत्र
कः।। स्यानत्रयागतो रिपीमंत्रो मत्तु समो मतः।। शत्रुर्न्नैवाति यद्यादौ मध्ये सि
द्धस्तदंतके साध्यः। कोष्ठेन कार्यसिद्धिस्तस्य फलं स्वल्पमेव भवेत्। अंते पदि
भवति रिपुः प्रथमे मध्ये च साध्यपुगततनं। कार्यविलंबितं स्यात्त्वरास्पीति
सर्वमेवांते।। सिद्धं स्तु सिद्धं मथवारिपुरांतरितं परीक्षयेद्यत्नात्।। द्वुःस्वाया

राम०
॥3॥

संपूर्ज्वलितं मंत्रं वर्जयेन्मतिमान् ॥७॥ अथ स्वकुलान्यकुलभेदः कथ्यते ॥ उ ऊ
ओ ग ज द ड व ल ताः पार्थिवाः ॥ आ ऋ औ घ ॠ ठ ध म व साः वारुणाः ॥ इ ई ए ख छ
ठ य फ र क्षाः आग्नेयाः ॥ अ औ ए क च ट त प य षाः मारुताः ॥ लृ ह्लृ अं ङ ञ णा नाभ
साः ॥ साधकस्याक्षरं पूर्वं मंत्रस्यापि तदक्षरं ॥ एतद्येकभूतं दैवतं जानीयात्
स्वकुलं हि तत् । तथैव नक्षत्रगणानामपि स्वकुलं ॥ एतदन्यकुलं । पार्थिवे वारु दन्य५
णं मित्रं ॥ आग्नेयस्यापि मारुतं मित्रं । पार्थिवस्याप्यक्षरा राः । च शत्रुत्वे मारुतं
स्थितं । आग्नेयस्यांन संशत्रुरं भसस्तेज सं तथा । एतेषामपि सर्वेषां मवि
रोधि तु नाभसं ॥ परस्परविरुद्धानां न कुर्यान्मेलनं बुधः ॥ अथ मंत्राणां वा

नं०
॥५॥

लादिभेदः कथ्यते। एकादशादिमारभ्य षोडशाक्षरपर्यंता वात्ताः॥ ततऊर्ध्वं विं
शतिर्यावत्प्रोक्ता॥ ततोन्ये स्थिरा ज्ञेयाः। ये स्वाहांतास्ते स्त्रीरूपा ज्ञेयाः।
ये हुंफडंतास्ते पुमांसः। नमोंतास्ते नपुंसकाः॥ अथ राशिभेदनं कथ्यते। अ
आइई मेषः १ उऊऋ वृषः २ ॠऌॡ मिथुनः ३ एऐ कर्कटः ४ ओऔ सिंहः ५
अंअः शषसहळक्षः कन्या ६ कवर्गस्तुला ७ चवर्गो वृश्चिकः ८ टवर्गो धनुः ९
तवर्गो मकरः १० पवर्गः कुंभः ११ यरलव मीनः १२ साधकनामाक्षरराशिमा
रभ्य गणयेत्। एकपंचनवबांधवाः स्मृता द्वौ च षट् दशमास्तु सेवकाः॥
त्रीणि सप्त रुद्रगणाः सुपोषकाः द्वादशाष्टचतुर्थास्तु घातकाः॥ अथ नक्षत्र

रा न०
॥५॥

प्रकार:॥ अआ अश्विनी देवगण:१ इ भरणी मनुष्यगण:२ ईउऊ कृत्तिका राक्ष
सगण:३ ऋॠऌॡ रोहिणी मनुष्यगण:४ ए मृगो देवगण:५ ऐ आर्द्रा मनु
ष्यगण:६ ओऔ पुनर्वसु देवगण:७ क: पुष्य: देवगण:८ खग अश्लेषा राक्ष
सगण:९ घङ मघा राक्षसगण:१० च पूर्वा मनुष्यगण:११ छज उत्तरा मनुष्य
गण:१२ झञ हस्तो देवगण:१३ टठ चित्रा राक्षसगण:१४ ड स्वाती देवगण:१५
ढण विशाखा राक्षसगण:१६ तथद अनुराधा देवगण:१७ ध ज्येष्ठा राक्षस
गण:१८ नपफ मूल राक्षसगण:१९ ब पूर्वाषाढ मनुष्यगण:२० भ उत्तरा
षाढ मनुष्यगण:२१ म श्रवणो देवगण:२२ यर धनिष्ठा राक्षसगण:२३

मं०
॥५॥
5

त्तशांततारकाराक्षसगणाः२४ वशपूर्वाभाद्रपदमनुष्यगणाः२६ ऊँभ्रः ज्ञाःरेव
तीदेवगणाः२७ साधकनामाक्षरात्साध्यदिक्षितेनगणायेत्॥ जन्मसंपद्विप
त्क्षेमप्रत्यरिःसाधकोवधः॥ मैत्रंपरममैत्रंचजन्मादीनिपुनःपुनः॥ विपत्प्र
त्यरिवधःपरित्याज्यः॥ अथमंत्राणांसुप्तप्रबोधकालोविधीयते। तत्रसर्वे
मंत्रास्त्रिधानवंति। प्रकृतिपुरुषात्मकरूपाउभयस्वभावाश्च॥ मातृका
याःसाद्दकरूपत्वात्। तत्रापिस्वराःषोडशसौम्याः॥ स्पर्शाःसौराः। परस्त्व
शषसहाःव्यापकाश्चाग्नेयाः। स्वराअपिह्रस्वदीर्घनपुंसकभेदात्त्रिधा॥
अइउऋऌओएतेषट्ह्रस्वाः। आईऊएऐऔअःषट्दीर्घाः। ॠॡऌनपुं राम०
॥५॥

सकाः ॥ प्रबोधप्रकारस्त्वयं । यदा दक्षिणे भागे वायुर्वहति तदा दक्षिणायनं तदानीमेव ह्रस्वाः ॥ प्रबुद्धा भवंति । तदाद्यास्तत्प्रचुरास्त्र मंत्राः प्रबुद्धा भवंति । एवमस्त्वदं तरेखा व्याप्रकालः । यदा तूत्तरभागे वायुर्वहति तदोत्तरायणं तदानीमेव दीर्घाः प्रबुध्यंति । तत्प्रधानाश्च तदाद्यास्तत्प्रचुरास्त्र मंत्राः प्रबुध्यंते । यदा चोत्तभागाद्दक्षभागप्रवेशसमये कियंतमपि कालं वायोः स्थिरीभावस्तदा विषुवत्कालस्तदानीमेव क्लीत्वरहितवर्णाः प्रबुध्यंते । तदा तत्प्रचुरास्त्र मंत्राः प्रबुध्यंते । तथा दक्षभागादुत्तरभागप्रवेशसमये उन्नयत्र वायोः स्थिरीभावस्तदा क्लीत्वरहितवर्णा प्रबुध्यंते । तत्प्रधानाश्च

मं०

॥६॥ मंत्राःशृणु॥ अथवा मंत्राणां पानसमरसाकंरसोनमृताधाराद्युत्यसंतीं विघुत्त
द्भुतविवर्तां ऋद्धिस्पर्शो घचकोर्के नरां। निरवधिमहानंदप्रदायिकाकृत्त
शक्तिसमुत्थाय्य शिवशक्तिसामरस्यमास्थितस्यकस्यापियाद्वितीयाप
रिमितानंदचमत्कारदृशा सापि सर्वमंत्राणां प्रबोधकालः॥ एतदन्यो प्रबो
धकालः। जपश्च सर्वमंत्राणां प्रबोधकाल एव॥ मंत्रोपदेशाख्य। मातृका
क्षराणि लकारपर्यन्तं सानुस्वाराणि साध्यमंत्रेण प्रत्येकं संपुटीकृत्य सं
कारं केवलमुच्चार्य्य पुनर्लकारादीनि सविसर्गाणि तथैव संपुटीकृत्य रा०मं०
जपे क्रियमाणे मंत्रः शीघ्रं सफलो भवति। अथ मंत्राणां धनशोधनं क ॥६॥

6

ध्यते॥ इंद्रदंनेत्ररविपंचदशर्तुवेदवह्न्यायुधाष्टनवभिर्गुणितान्स्वसाध्यान्॥
दिक्सूर्याद्रिश्रुतिगजाग्निमुनीषुवेदषड्वह्निभिःस्वगुणितानथ साधकाणि न्।
नामाक्षरादकं दत्वा व्यंजनक्रमशो वेज्ञात्वो नयोरधिकशेषूपुतक्षराःस्यात्। अस्यां
यमर्थः॥ साध्यानामाक्षराशिस्वरव्यंजनरूपेण पृथक्कृत्वा प्रत्यक्षरमिंद्रादि
भिरंकैर्यथासंख्येन गुणयेत्॥ कथं इंद्र१४ दंत३२ नेत्र२ रवि१२ पंचदश१५
ऋतु६ वेद४ वह्नि३ आयुध८ अष्ट८ नवभि९ एतैरिति यावत्। तथा साधक
नामाक्षराशिस्वरव्यंजनरूपेण पृथक्कृत्वा दिग्भिरंकैर्गुणयेत्। कथं। दिक्१०
सूर्य१२ अद्रि७ श्रुति४ गज८ अग्नि३ मुनि७ इषु५ वेद४ षट्६ वह्नि३ एतैः

मं०
॥७॥ कोरित्यर्थः॥ नामामृत्वादित्ययमर्थः॥ नामस्वरव्यंजनसमुदायात्। अकठवान्
वर्गचतुष्टयप्रमितात्। इ२ उ३ ऋ४ ऌ५ ए६ ऐ७ ओ८ औ९ अं१० अः११ इत्येते अ
वर्गाः॥ क१ ख२ ग३ घ४ ङ५ च६ छ७ ज झ८ ञ१० ट११ इत्येते कवर्गाः॥ ठ१ ड२ ढ३
7 ण४ त५ थ६ द७ ध८ न९ प१० फ११ इत्येते ठवर्गाः॥ ब१ भ२ म३ य४ र५ ल६ व७
श८ ष९ स१० ह११ इत्येते बवर्गाः॥ एतद्रूपासमुदायोत्यस्यात्। अकठवादिभिर
श्रुभिर्भागेकृते सति उभयोः साध्यसाधकात्तरवर्गयोः शेषस्याधिक्यरूपस्य
त्सांधनंच ज्ञात्वा मंत्रंदद्यात्। तथाराशिच्छिपात्त्मनोधनंस्यात् एवं पुत्र
शत्रुकलत्रकाः सर्सांधमिकर्मोपयव्ययात्तदादशाराशयः॥ एवंगरानायां राम०
॥७॥

स्वराशिमारभ्यमंत्रराशिपर्यंतंशत्रुमरसांव्ययात्॥षष्ठाष्टद्वादशाःपरित्याज्याः॥
मृत्युस्स्वीकार्यः।एवंसुदिनवारनक्षत्रकरणक्षेत्रेषुयथायथाशास्त्रोक्तपरिशो
ध्यदीक्षादातव्या॥सर्वसंपत्समृध्यर्थंपापापनुत्यर्थंचतत्रदीक्षानेकप्रकारा
क्रियामयीवर्णमयीवेधमयीकलामयीत्यादि।तत्रसर्वसमत्वात्सर्वाधार
रात्वात्सुप्रधानत्वाच्चक्रियामयींसंक्षेपतःप्रदर्श्यते।जगतोहितायशुभानु
कूलसमयेश्राद्देवास्तुरजोमारभेत्॥शास्त्रोक्तविधिनायथाततोभूमि
तलेशुद्धेतुषांगारादिवर्जितेपुण्याहंवाचयित्वाविप्राशिषासहशास्त्रोक्तदि
नमंडपंविरचय्यतन्मध्येयथादिक्कोणांस्थंडिलेवासर्वतोभद्रात्मकंमंडलं॥

मं
॥१८॥ अन्यद्वा ॥ यथाशास्त्रं विरचय्य मंडपस्य चतुर्दिक्षु प्राक्प्रोक्तलक्षणयुक्तानि कुं-
डानि प्रकल्पयेत् ॥ अथ चोत्तरस्यां दिशि चतुरस्रं सर्वसाधारणं सर्वमतमेकं
कुंडं मंडपतः प्राग्भागे मेखलात्रययुतं तत्र पश्चिमायां दिशि मेखलोपरि
८ यथोक्तां योनिं परिकल्पयेत् ॥ गुरुः शुद्धात्मा प्राङ्मुखो वामदक्षासने निविशेत् ॥
समाहितेन्द्रियो मौनी गोमयेनोपलिप्ते कुंडमध्ये नाभिस्थाने स्वगृह्योक्त-
प्रकारेण षट्रेखां वा षट्कोणां वा वृत्तं त्रिकोणां वा चित्ते रख्य स्थापयेत् ॥ दक्ष-
भागे तु पूर्णात्र्द्याशिताय पत्रं ततः शुभोदकेन समायुक्तं पूर्णकुंभं ततः सुमनसः
पात्रं परितः घृतप्रज्वलितान् दीपान् शुभान् पुरतः शंखं साधारं परितो व- राम०
॥१८॥

रं पात्रां शिरस्यान्यपि यथाक्रमं पश्चात् स्थापयित्वा निजवामदक्षिणपार्श्वयोर्गु
रुं गणेशं नत्वा भूतशुद्धिं यथाचरेत् । यथोक्तं ॥ प्राणायामं ततः कृत्वा मातृकां तत्र
विन्यसेत् । देहे ऋष्यादिकं तद्देवतां निजमूलमन्त्रस्य विन्यसेत् ॥ षडङ्गन्यासं ततः कृत्वा
करन्यासं विधिना । तत्तन्न्यासान् समारभेत् । तत्र मण्डलमध्ये धर्मादिपीठपूजा
नंतरमात्मपूजां विधाय हेमरजतताम्रमृन्मयकलशानां मध्ये अन्यतमं यथा
लाभं सम्यक्प्रक्षालितं तांतरं कर्पूरागरुधूपितं शोभनाकृतिं सप्ततन्तुत्रिसू
त्रवेष्टितं । नववस्त्रयुग्मेन वस्त्रगंधादिभिरभ्यर्चितं नवरत्नोदरदूर्वा
क्षतसमन्वितं । तारमुच्चारयन् मंत्री कर्णिकायां मध्ये मुखं स्थापयेत्

मं०
॥२०॥

पश्चाद्ध्यानं कृत्वा पीठस्य कलशस्य चैक्यं संभावयेद्धिया। प्रोक्तकषायोदकैस्ती
र्थोदकैर्वान्यैः शुद्धतरैर्वा जलैः कर्पूरवासितैः। प्रतिलोमेन मातृकान् जपन्नेत
ध्येव च मूलमन्त्रं जपन्पूरयेत्तं कलशं देवताधिया। ततः शंखेकस्यायां चु
पूरिते शुद्धतोयेन चाष्टगंधं समालोड्य चावाहयेच्चकलाः सुधीः। इहस्थाना
इत्यादिप्रकारेणा च पात्राप्रतिष्ठां च। तद्यथा। ॐ श्रं अमृतायै नमः। अमृता
मावाहयामि इत्यमृतामावाह्य जलगंधादिभिः संपूज्य अमृतायाः। प्राणा
इह प्राणा इत्यादिप्रकारेण प्राणप्रतिष्ठां च कृत्वा॥ ॐ श्रां मानदायै नमः।
ॐ इं पूषायै नमः। ॐ ईं पुष्ट्यै नमः। ॐ उं तुष्ट्यै नमः। ॐ रत्यै नमः। ॐ धृत्यै न

९

रा मं०
॥२०॥

ञं शशिन्यै नमः। टं चंद्रिकायै नमः। ठं कांत्यै नमः। डं ज्योत्स्नायै नमः। ढं श्रियै न
मः। णं प्रीत्यै नमः। तं अंगदायै नमः। थं पूर्णायै नमः। दं पूर्णामृतायै नमः। एता
सां प्रत्येकं पूर्वोक्तप्रकारेण प्राणप्रतिष्ठां पूजां च कृत्वा अनंतरं। ॐ कं भं तपिन्यै
नमः। तपनीमावाहयामीत्यादिवाक्यतपन्याः प्राणाः इह प्राणाः इत्यादि प्राणप्रति
ष्ठां च कृत्वा। ॐ खं बं तापिन्यै नमः। ॐ गं फं धूम्रायै नमः। ॐ घं पं मरीच्यै नमः। ॐ ङं नं ज्वा
लिन्यै नमः। ॐ चं धं रुच्यै नमः। ॐ छं दं सुषुम्णायै नमः। ॐ जं थं भोगदायै नमः। ॐ झं
तं विश्वायै नमः। ॐ ञं णं बोधिन्यै नमः। ॐ टं ढं धारिण्यै नमः। ॐ ठं डं क्षमायै नमः।
एतासां प्रत्येकं पूर्वोक्तप्रकारेण प्राणप्रतिष्ठां पूजां च कृत्वा। ॐ यं धूम्रार्चिषे नमः

मं०
॥१०॥ ॐ रं कृष्णायै नमः। ॐ लं ज्वालिन्यै नमः ॐ वं ज्वालिन्यै नमः। ॐ शं विस्फुलिंगिन्यै नमः
ॐ षं सुश्रियै नमः। ॐ सं सुरूपायै नमः। ॐ हं कपिलायै नमः। ॐ ळं हव्यवाहायै नमः
ॐ क्षं हव्यवहायै नमः। इत्यभ्यर्च्य। एतासां पूर्वोक्तप्रकारेण प्राणप्रतिष्ठां च कृत्वा।
तदनंतरं। ॐ कं सत्वाय नमः। ॐ खं रजसे नमः। ॐ गं तमसे नमः। ॐ घं मेधायै नमः।
10 ॐ ङं कांत्यै नमः। ॐ चं वेतदंत्यै नमः। ॐ छं दृत्यै नमः। ॐ जं स्थिरायै नमः। ॐ झं स्थि
त्यै नमः। ॐ ञं सिद्ध्यै नमः। ॐ नम इत्यादि प्रकारादि संपूज्य। प्रत्येकं प्राणप्रतिष्ठां
च कृत्वा। ॐ ह्रीं। ॐ सः शुचिषद्वसुरंतरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्। नृष
द्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्। इत्येकामक्षं पठित्वा रामं०
॥१०॥

पूजयामीति संपूज्य प्राणप्रतिष्ठां च कृत्वा । अनंतरं । ॐ टं जरायै नमः । ॐ ठं पालिन्यै
नमः । ॐ डं शान्त्यै नमः । ॐ ढं ईश्वर्यै नमः । ॐ णं रत्यै नमः । ॐ तं कामिकायै नमः । ॐ थं
वरदायै नमः । ॐ दं ह्लादिन्यै नमः । ॐ धं प्रीत्यै नमः । ॐ नं दीर्घायै नमः । इति जलादिभिः
संपूज्य प्रत्येकं प्राणप्रतिष्ठां कृत्वा आसां प्रत्येकं । प्रतद्विष्णु स्तवते वीर्येण मृगो न
भीमः कुचरो गिरिष्ठाः ॥ यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा
इति पठित्वा अस्य च मावाहयामि त्वा वाद्यं अस्य च पूजयित्वा अस्य च । प्राणा इह प्राणा इ
त्यादि प्रकारेण प्राणप्रतिष्ठां कृत्वा नंतरं । ॐ पं तीक्ष्णायै नमः । ॐ फं रौद्र्यै नमः ।
ॐ बं भयायै नमः । ॐ भं निद्रायै नमः । ॐ मं तंद्रायै नमः । ॐ मं तंद्रायै नमः । ॐ क्षुत्यै

मे०

नमः॥ ॐ हं क्रोधिन्येनमः ॐ लं क्रिपायेनमः॥ ॐ वं उन्मत्तायैनमः॥ ॐ शं मत्स्येनमः

॥२२॥ इत्यादिप्रकारेणानन्तादिभिः संपूज्य प्रत्येकं त्र्यंवकमिति ऋचं पठित्वा। त्र्यंवकय

जामहे सुगंधिंपुष्टिवर्द्धनं। उर्वारुकमिव वंधनान्मृत्योर्मुक्षीय मामृतात्॥ त्र्यं

वकं यजामहे सुगंधिं पतिवेदनं। उर्वारुकमिव वंधनादितो मुक्षीय मामुतः॥ इति

पठित्वा त्र्यंवकमावाहयामीत्यावाह्य ऋचं पूजयामीति पूजयित्वा त्र्यंवः प्रार्थ्य इ

ष्ट्वा इत्यादिप्रकारेण प्राणप्रतिष्ठां च कृत्वा। अनंतरं ॐ ह्रं पीतायेनमः॥ ॐ

सं श्वेतायेनमः॥ ॐ हं सुरक्तायैनमः॥ ॐ लं असितायैनमः॥ ॐ सं अनंतायेनमः॥

नमइत्यादिप्रकारेण प्रत्येकं माषाद्यैः संपूज्य प्राणप्रतिष्ठां च कृत्वा। आसांप्र राम० ॥२१॥